This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

3454 (नं. ७४)

श्रीगणपतये नमः ॥ निर्विघ्नमस्तु ॥ श्रीलीलानंदाचरणं ध्यात्वा दीक्षितसत्कृतीं ॥ रत्नत्रयपरिक्षाख्यां स
व्याख्यां विलिखाम्यहं ॥ अथ रत्नत्रयपरिक्षाख्यामद्य श्लोकीं संक्षेपेण व्याकुर्महे ॥ निसं निर्दोषगंधं निरतिशयसु
खं ब्रम्हचैतन्यमेकं धर्मो धर्मीति भेदद्वयमुपगतिप्रथमस्त्यतमायावसेन ॥ धर्मस्तत्रानुवृत्तिस्सकलसकलविषयि
णी सर्वकार्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयश्चैक एव ॥१॥ निसं दोषगंधेनापि रहितं निरति
शयसुखात्मकं अद्वितीयं ब्रम्हचैतन्यं मायया कल्पितभेदं सत् धर्मीधर्मेति विभागं प्राप्नोति जीवब्रम्हविभागव
दयं धर्मधर्मिविभागोपि तत्र धर्मस्वरूपमात्रप्रकाशरूपस्य धर्मिणः परब्रम्हणस्सकलप्रपंचविषयानु
वृत्तिर्भवति ॥ तदुक्तं कूर्मपुराणे शिवेनैव ॥ तयाहं संगतो देव्या केवलो निष्कलः परः ॥ पश्याम्यशेषमेवेदं यस्त्
वेदसमुच्यतइति ॥ स एव धर्मस्तस्य सर्वकार्यानुकूला शक्तिस्सर्वोपि गुणगणश्च भवति ॥ तदुक्तं श्वेताश्वतरो
पनिषदि ॥ परास्य शक्तिर्विविधैः श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति ॥ अस्य शक्तिदेवस्वाभाविकी स्वभावया
दिनामहापर्वतादिधारणानुकूलो गुणः धर्मज्ञानरूपशक्तिः सैव धर्मिणस्सकलगुणाध्यालिका चेत्यपि युक्ता
अप्याहुः शक्तिः शरीरमधिदैवतमंतरात्मा ज्ञानं क्रियाकरणमासनजालमिच्छा ॥ ऐश्वर्यमायतनमाव
णानि च त्वं किं तं न यदुद्भवसि देवि शशांकमौलेरिति ॥ अस्यैव धर्मज्ञानस्य महिमानमुपनिषत्सु धं प्रप
चयति ॥ वेदज्ञाः धर्ममेतं प्रवितततमखिलाधारमाकाशमाहुः ॥ किं चानंदं मनोवाग्विषयमधिकं धर्मिणो
वर्णयंति ॥ सत्तास्फूर्ती सुखं च त्रयमपि जगतां संगिरंते दशं प्राणाकाशाद्युपास्तिः केतिचिदपि तदात्म
बनास्ते वदंति ॥२॥ बृहदारण्यकोपनिषदि । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदंतरा द्या

Acc. No. ~~3454~~. M-1843
Title – रत्नत्रय परीक्षा (स्वोपज्ञ व्याख्या सहित)
Author – अप्पयदीक्षित.
Date – ?
Sub – वेदान्त दर्शन.
folio – 16 avalible. (2,4,5,6 missing)
Xerox – 31.

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M-1843 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१

परिक्षा

चापृथिवीयद्भूतं च भवच्च भविष्यच्चेत्याचक्षते त्वस्मिन्नदोतं च प्रोतं चेति गार्ग्या पृष्टेन याज्ञवल्क्येनआका
शएव तदोतं च प्रोतं चेत्यभिहिते कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति पुनस्तया पृष्टेन तेन तद्वै तदक्षरं
गार्गि ब्राह्मणा अभिवदंतीत्यादिना अक्षरशब्दितं सर्वज्ञत्वादिविशिष्टं ब्रह्म प्रतिपाद्य तस्मिन्नु खल्वक्षरे
गार्ग्याकाश ओतश्च प्रोतश्चेत्यादिना उत्तरमभिहितं तत्राकाशोनंतोनाकाशः तस्य परिच्छिन्नस्य त्रलिकल्प
भिन्नस्य च सर्वमादेशकालवर्त्तिप्रपंचस्याधारत्वासंभवात् अतो धर्मज्ञानरूपाचिदंचिदंबरशक्तिरेव आ
काश इत्यवसीयते ॥ तत्र आसमंतात्प्रकाशयति प्रपंचमवभासयतीति परब्रह्मणः सर्वविषयज्ञानरूपेत
स्मिन्नवयवार्थानुगतिसद्भावात् ॥ यस्य सा परमादेवी शक्तिराकाशसंज्ञिता ॥ अनंतैश्वर्ययोगात्मा महेशो
दृश्यते हि न इति श्रीकूर्मस्मृत्या तस्याकाशशब्दवाच्यत्वावगमात् ॥ एवं छंदोपनिषदि मंत्रभागे ॥ ऋतं त
स्ये प्रतिष्ठितं त्वं तेन विश्वम्युता सह इति भूतभविष्यद्वर्त्तमानसकलप्रपंचाधारत्वेन प्रवृत्ते सत्ये आकाश
उपनिरूप्यतु महत्परमधोक्षिय मिति आकाशशब्दप्रयोगेण अक्षरधर्मिको बृहदारण्यकोक्तोकाश एव
अयं जगदाधार इत्यवसितं ॥ अत्र ऋतशब्देनाप्येतद्धावापि चिन्तातादृग्विषयतया निश्चितत्वात्तादृशेष्याख्ये
वर्त्तमानत्वमुक्तं अयं चाकाशोनंतोनाकाशादन्य इत्यनंतरमेव स्पष्टीकृतं ॥ आकाशोह्येष आकाशो यदेत रा॰
द्युतिमंडले भिस्त्र प्रसृतवाचिने तच्छब्देन शक्नत माकाशं परमस्य सप्रसिद्धाकाशस्याप्याकाश इत्युक्त्या ५१५.
मेन्नम. धस्यापि मन्मघइ सकृत्यो मन्मधांतरवदाकाशो नांतरं प्रतीयते आकाशो ह वै नामरूपयोर्निर्वहिता ते यदंत
रा तद्ब्रह्मेति निर्विकारतया नामरूपास्पृष्टो ब्रह्मणो वैलक्षण्येन नामरूपनिर्वोढृ तया प्रतिपादित न आका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थ धरिणो धर्मस्य कृत्स्नविभागं दर्शयति। कार्त्स्न्येन तस्य धर्मी कल्पयति जगतां पंचके सृष्टिपूर्वे धर्मः पुंरू
पमात्मस्य कल्लर्जगदुपादानभावे विकार्ति॥ स्त्रीरूपं प्राप्य दिव्याभवती च महिषिस्वाश्रयस्यादिकं चतुः
प्रोक्ता धर्मत्रजे दावपि निगमविदं धर्मिवद्ब्रह्मकोटि - - - - - - - - - हारति रोधानान्नु यद्ब्रूरू
पाणि पंचकस्यानि तिरोधानान्नु यद्बंधमोक्षादिए तेषु विश्वस्य सृष्ट्यादिषु धर्मी केवलं कर्ता
भवति धर्मस्तु पुरुषवनितारूपेणाविभागं प्राप्य पुरुषरूपेणाविश्वस्योपादानं भवति वनितारूपेण ध
र्मिणः परब्रह्मणो दिव्यमहिषीभवतीने च पुरुषवनितेनास्मदादिवज्जीवकोटिः किंतु ब्रह्मकोटिः इति वेदवि
दां सिद्धांत इत्यर्थः। ननु ब्रह्मधर्मस्य ज्ञानानंदेच्छादिगुणरूपस्य वह्निगतदहनशक्तिवद्ब्रह्मगतस्यैव्या
दिशक्तिरूपस्य च कथं स्वतंत्रचेतनत्वं येन तस्य पुरुषवनितारूपो विभागः स्यात् उच्यते यदैकस्यैव तस्य
ज्ञानानंदेच्छाद्यनेकगुणत्वसत्वं एवं च धर्मिणा प्रतिनिधा तस्यापि स्वतन्त्रत्वादगुणविशिष्टास्वतंत्रचेतनत्वमप्यु
पपद्यते अत एव ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति श्वेताश्वतरमंत्रे देवस्य
परब्रह्मणः शक्तावात्मत्वविशेषणेनान्यौ नरआत्मनंदमपहसानेद वल्या मालनिर्देशश्च वहदार
ण्यके गार्गीब्राह्मणेऽप्यव्यादिषु ब्रह्मलोकांतेषु पूर्वपूर्वं प्रस्तुत्य - तद न्याधार होत्तय नंतरं कस्मि
न्नु खलु ब्रह्मलोका ओतश्च प्रोताश्चेति पुनर्गार्ग्या पृष्टे न याज्ञवल्केन गार्गि मातिप्राक्षीर्मा ते मू
र्धा व्यपप्तदनतिप्रश्न्यां चै देवतामतिपृच्छसीति तत्रात्मत्वाविनर विशेषरूपदेवतात्वनिर्देशश्च तत्र
हि ब्रह्मलोकानामोतप्रोतत्वं च रमाकांशो वर्णनीयं सा परा देवता गुरूप सदना दि नियममतिक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
२

परिक्षा

न्यप्रष्टुमनर्हति मति ऋन्यतां मा तिष्ठा क्षिरिति खल्लु तत्रैदैवतापदावक्ष्यमाणपरमाकाशपरंब्र
युक्तं अंतो धर्मस्य ततः स्वतंत्रयेत्तन्वमप्युपपद्यत एवनन्वेस्तु तथा तयोः पुरुषचनितु यो ब्रह्मकोटि
त्वं कुतोवसीतइत्याकांक्षायामाह ॥ योगो धर्मी सदाशंभुस्स शिव इति परब्रह्म चेति प्रसिद्धो पाचोक्ताः प
र्मि — स्या विघटितमहिम्नी — विकोमेति विप्रा ॥ यश्चोपादानन्ततः पर इति पुरुषस्तेष नारायणो न्कारख्यातः ॥
श्रीकूर्मवाक्यैरधिगमितमिदं नारद — — वाक्यैः ॥ ४ ॥ अत्र शिवो धर्मी तद्धर्मो शाश्रुमानारायणोनावपि ब्रह्म
कोटि इत्यत्र गमकानि श्रीकूर्मवचनान्युदाहरिष्यामः तत्र मंदरशिखरिणी उमासंरक्षणार्थं विष्णुमि
युज्य देवहासवनं गत्वा तत्र तपस्यतोनुग्रहमदेरं त्रतिनिवृत्तः शिवस्तत्र गौर्या नारायणेन च सहोप
विष्टो देवर्षिगंधर्वादिभिस्सेव्यमानोद्भिरास्ते इति प्रक्रम्य दृष्ट्वासिद्धासनासीनोसव्यांगेयं नारायणेन
चमरणस्य देवमीशानं पृष्टवत्यो वरांगनाः ॥ कात्वं विभ्राजसे कांसा केयं नाल्परविप्रभा ॥ कोन्वयं भातिपुरुषः
पंकजायतलोचनः ॥ इति कासांचिद्देवकन्यानां प्रश्नमुपन्यस्य तत्र शिवस्योत्तरवचनानि दर्शितानि ॥ अयं
नारायणो गौरी जगन्माता सनातनी ॥ विभज्याहं स्थितो देवः स्वात्मानं — — — श्वरः ॥ नमे विदुः परंतत्वं
देवाद्या न महर्षयः ॥ एकोहं देवि विश्वात्मा न मानी विष्णुरेवच ॥ अहं हि निष्क्रियो धाता केवलो निष्परिग्रहः ॥
मामेव केशवं देवमाहुर्देवि मन्यांबिकामिति ॥ एवं शिवेन गौरीनारायणयोः स्वात्मेदमुक्त्वा तयोः स्वधर्मरू
पत्नेदासत्वमनन्नं नरमेकाधिष्कृते ॥ कूटस्थोयस्सरोव्यापी योगी नारायणाह्वयः तारकः पुरुषो ह्यात्मा केवलं
परमंपदं ॥ सैषा माहेश्वरी गौरी मम शक्ति — — — — शांतासत्यापरानंदापरंपदमिति श्रुतिरिति ॥ अत्र

राम
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या न श्चाव्यैयाश्च सद्गारः प्रथितो गुणः॥ नारायणो महातेजास्स्व वैवल्लोकभावनः॥ भो कामहेश्वरो
देवः कर्त्ती विष्णुरधोक्षजः॥ ब्रह्मस्वेगणाश्चान्ये पश्चात्स्पृष्टा महात्मना॥ महादेवेन देवेश
प्रजापतिगुणास्तथा॥ एवं पुराणपुरुषो विष्णुर्वेदेषु पठ्यते॥ अचिंत्यश्चाप्रमेयश्च गुणिभ्य
श्च परस्तथेति॥ अत्र शिवस्यांशो नारायणः प्रदर्संशो गौरीति गौरी शिवयो गौरी नाराय
णयोश्चाभेदः प्रतिपादितः॥ नारायणस्य परमशिवाभेदः प्रतिपाद्यत इति प्रतीयते॥ उ
च्यते एतान्यपि वचनानि श्रीकूर्मसनत्कुमारवचनानुरोधेन नेतव्यानि तन्नयनप्र
कारश्चेत्थं तस्याव्यक्तस्येत्यत्र अव्यक्तशब्देन प्रतीतिरूपा चिच्छक्तिरुच्यते अव्यक्तात्र
कृतिदेवीस्य ये विवरणात्॥ इह स्त्रीलिंगनिर्देशाभावस्तस्येति हरपरामर्शिपदसमानाधि
करण्यात्॥ तत्सामानाधिकरण्यनिर्देशस्तु चिच्छक्तेर्धर्मधर्मिभेदस्फोरणार्थः॥ तथा च तस्य ह
रस्याव्यक्तचिच्छक्ति[illegible] च स्थापन्नस्य यो व्यक्तो भागः॥ स कीदृशः सर्वात्मन वोद्भवः सर्वका
र्योत्पत्तिहेतुः अनेन सर्गादौ चिच्छक्तेस्सकलकार्यवर्गकारणतयाव्यक्तो भागः॥ कश्चि

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैरेत्रय
७

दाविर्भूतो निलभ्यते कारणात्मनाव्यक्तस्य भागस्य संबंधी त्रयमुञालाकार्यवर्गस्यावांतरका
रणभूतान्हिरण्यगर्भादीनपेक्ष्यं यथ्थेतनैस्सहिरण्यगर्भस्सकलचराचरप्रपंचोपादा
नभूतो भगवन्वीपुरिति सर्वधीमतो विवेकिनोमतमिदं व्यक्तो भागे कस्मिंश्चेदिनक्तोसति
तदव्यक्तभागो यः तन्मूलतयोदितः सा भगवती गौरीतित्तस्मात्सर्वमनवद्यं एवं शिवस्यध
र्मिरूपत्वं गौरीनारायणयोस्तद्धर्मव्यक्तभागरूपत्वं अतएवत्रयाणां ब्रम्हकोटित्वं चसमर्थितं ॥
अथ नारायणस्यमहिमानं शिवप्राप्तिमिच्छतां तत्समाश्रयणावश्यंभावं च दर्शयति ॥ तस्यै
वापरस्यपुंसः परिणतिररिवलोप्यंबरादिर्विकारोतस्यैवांशो विरिंचावधिसकलोप्यषसंसा
रीवर्गः प्राप्येखलेवतस्यत्रवदनमनन्तस्यायमानेदमूर्तिस्थानंसर्गस्यलुब्धंतदमततन
यैर्देवदेवैः पुराणैः ॥५॥ हरेकस्यैवपरिणामोवियदादिस वोविकारः पश्चकिंचिज्जगदिसा रिह
दिमंत्रवर्णात् नचनिरवयवस्यपरिणामानुपपत्तिः ॥ रोपेतमोमंत्रे प्रज्ञाचतस्मात्प्रसृतापु राम ७
राणीतिधर्मिज्ञानस्यप्रसरणोत्यापरिणामित्वविनावनात् ॥ ब्रम्हमीमांसायां सत्त्वप्रसक्तिर्निर

परिक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्किर्निरवयत्वशब्दकोपोवेत्ति स्सूत्रेणाव्स्लेकदेशविकल्प्य याब्रह्मणोविश्वाकारपरिणामा
नुपपत्तिमाशंक्यस्थते स्त्कशब्दमात्वत्वादिस्सूत्रेण श्रुतिप्रतिपन्नेर्थे नैवंभूतकुतर्कावाकाशइ
ति समाहितत्वाच्च हरिवंशे कैलासयात्रायांयस्तकारणमाहुतदव्यक्तकं सनातनंत्रिघणर
तं जगद्योनिः प्रधानंकारणात्मकं ॥ सत्वरजस्तमोविष्टो जगद्द्वंद्वं जनार्दन ॥ तस्यकारण
माकुलस्थांसांख्यास्तवविदोहरे ॥ ततोमहान्समुत्पन्नः प्रवृत्तेर्जन्मकारणं ॥ तद्दूषेणन
चान्विच्छोपरिणाम्याधितिष्ठतीति विष्णुप्रतिशिवेवचनेन तस्यपरिणामिकारणत्वस्फुटी
करणाच्चप्रवृत्तेर्जन्मकारणं नवान् प्रवृत्तिरूपेण परिणाम्य महदादिकार्यमधितिष्ठ
ति व्याप्नोतीत्यर्थः ॥ तथा सर्वस्मां सारिकोनारायणस्यैवांशः ॥ ममैवांशोजीवलोके इतिस्त्मा
रस्यात्तदाश्रयणवशेवच शिवस्य दिव्यस्थानं प्राप्तव्यं ॥ त्वा मनाश्रियविश्वात्मन्नयो
गीमामुपेष्यति ॥ पालयैतज्जगत्कृत्स्नं सदेवासुरमानुषमिति कोर्मेनारायणंप्रतिशिवव
चनात् ॥ शिवस्यदिव्यंस्थानमानंदमूर्तिर्यादिनाविशेषितंतद्विप्रवृत्तिमायामहामाया
विकारमलिन शुद्धमिश्रप्रपंचातीतंपरमशिवादिशक्तिरूपपरमानंदमयंशिवपुराणा

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिवस्यलनयै: देवा
दिषुसिद्धं अमतस्य एतानिह वा अमतस्य नामधेयं नीयमत शब्दितस्य शिवस्यलनयै: देवा
नामपि देवै: पुराणोक्तं च तत्राऽमतत्तनयेरिसनेन युजेवां ब्रह्मपूर्व्यं ननमो भिर्विश्लोकायंति
पश्च्येव सूरेश्च श्रण्वंति विश्वे अमतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुरिति श्वेताश्वतरमंत्र
प्रतिपन्नास्तेषां महिमास्मारितः अस्य मंत्रस्यायमर्थः। वायुर्वयोः शिवशंको मे घ्येपूर्व्यं स्वा
र्थे यप्रत्ययः॥ विशेष्यतया प्राधान्यमतं ब्रह्म शिवरूपं नमोभिर्युजे युजजिमध्यां दसो विकरण
व्यत्ययः। शिवस्य सर्वेन नमस्कारपर्यवसानमभिप्रायात्॥ नमस्कार — — — — — — — प्रजा
मीयर्थः नमस्कारश्लोकाविशेष्यंते सूरेः विदुषः शिवस्वरूपाभिज्ञस्य तत्नानानुक्रमं प्रा
मुस्य मम श्लोकाः वाच्यकनमस्कारसंदर्शरूपाः अह८श्लोकवदितितु कश्चसत्वेन श्रुतिप्र
सिद्धाः पथ्येव पथिहिताः सूरितविकारमार्गगमनाः सदृश्याइदयंतिनिरर्गलप्रचार
तयानिर्गच्छंति पथ्य शब्दात् सुपां सुजगतिसूत्रेणजसआकारः। विश्वेप्यमतस्य शिवस्य
पुत्राः नंदिकेश्वरादयः। पारिषदाः श्रण्वंति अमतस्य पुत्रा विशेष्यंते ये दिव्यानि दिविभवा
नि चिदाकाशरूपे नि सकैलासे स्थिता नि धामानि भवनान्यातस्थुरिति देवदेवैरिसनेनदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चवृत्तारव्यसामग्रतिपन्नस्तेषां महिमास्मारितः तत्र हि पथि पृथ्वीविषदांतरिक्षसद्दो दिवि
षदोप्सुषदो दिक्षुसद आकाशसदश्चेत्येवं सकलंजगद्व्यापिनस्ते प्रतिपर्यायं द्विशार
मावर्त्तिते देवदेवशब्दैः सादरं सकलदेवनियंतृत्वेन प्रतिपादिताः तथा शिवपुराणे
प्युपबृंहितं ते हि साक्षाद्दिविषदो ह्यंतरिक्षसदस्तथा ॥ पृथ्विविषद इत्ये — — दे — ते स्मृता
इति पुराणेरिसे नेन दिव्यागणा बहुरूपाः पुराणा इत्यायुष्यसूक्ते प्रतिपन्नास्तेषां महिमा ही
स्मारितः तेषामेतावन्महिमजातं भगवता व्यासेन संगृहीतं ॥ कामकारकराः सिद्धास्त्रैलोक्य
स्येश्वरेश्वराः ॥ निसानंदाः प्रमुदिता वागीशा दिनमत्सराः ॥ प्राप्याष्टगुणमैश्वर्यं येन पा
तिच विस्मयं ॥ एषां विस्मयते नियं कर्मभिर्भगवान्भवः ॥ मनोवाक्कायनिरतान्पाति
पुत्रानिवौरसान् ॥ श्रुतेन ब्रह्मचर्येण तपसा च यमेन च ॥ ये समाराध्य शूलांकं तेसायु
ज्यं समागता इति ॥ अत्र त्रैलोक्यस्येश्वरेश्वरा इत्यनेन देवदेवत्वं संगृहीतं वागीशा इ
त्यनेन श्लोककृत्स्नश्रोतृत्वं च संगृहीतं पाति पुत्रानिवौरसानित्यनेन अमृतस्य पुत्रत्वं सं
गृहीतं दिव्यागणाः बहुरूपाः पुराणा इति मंत्रोक्ते बहुरूपत्वं तु प्रागेव तेषां बहुशो पार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय

श्रीनशेपोक्त्या संगृहीतं। अथ गौरीमहिमप्रदर्शनपूर्वकं तस्याः शिवसहोपासनानियमं दर्शय
ति॥ ख्याताः कोट्योनुवाष्टादशपरमभिताः स्थाणुवैकुंठवेध शक्तिनां यत्कलौ शास्त्रि
विषयाः शंकरस्यैववक्त्राण्याः। याविख्याताः सप्ताब्धिः श्रुतिशिरशिपरब्रंम्हविद्यात्रशास्त्रिसाहि
त्यैंसा नवीनीनजति नियमत्तशंकरोपासनासु॥ अत्र सर्वशक्तीनामुमांशत्वेन शंकरनोग्यत्वे
वाराहपुराणवचनानि। नवकोट्यस्तु चामुंडा नेदो भिन्ना व्यवस्थिताः। याशैद्रीतामसीशक्ति
सत्वाभुंडाप्रकीर्तिता॥ अष्टादशतथाकोट्यो वैष्णव्या नेदउच्यते॥ यासात्तुराजसीशक्तिः
पालनीसैववैष्णवी॥ याब्रम्हशक्तिस्सत्वस्थासानंतावैप्रकीर्तिता॥ एतेषु सर्वते देषु पृथगे
कैकशोदृषे॥ सर्वासान् भगवान्रुद्रस्सर्वगवाववर्तिर्नवेत्॥ यावेसस्यामहाशक्तिस्ता
वद्रूपाणि शंकरः॥ स्तवान्तास्तु नजते पतिरूपेण सर्वदेति। उमायाः परब्रम्हरूपत्वे स
तत्राकाशे स्थियमाजगाम। उमांहैमवतीं बहुशोभमानामित्यादि तलवकारोपनिषद्वाक्ये
नेध्यानयोगानुगत्वाआवश्यनद्देवात्मशक्तिं स्वगुणैर्निगूढामित्यादि श्वेताश्वतरोनिषद्
मंत्रे च प्रसिद्धं। शिवोपासनायांतस्यास्सहोपासनानियमः तस्मास्सहतयाशेच्यासह

परीक्षा

विद्या
राम
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्ष्यंतियेशिवं॥तेषांशाश्वतिकीशांतिर्नेतरेषांश्रुतिरितिशिवपुराणेप्रतिपादितद्विशिवोपासना
यासाक्षान्मुक्तिहेतुस्तमाह॥श्रीमत्कौर्मेचयायाश्रमपरविषयानावनोक्तातृतीयादिसख्या
नप्रदात्रीसगुणविषयणीत्रांकरालंबनासा॥येत्वन्येजावनेदसरसिजनयमेनादिशेच्याच
युक्तेप्रापण्यांतेनुतस्याःक्रमुकफलयुतेमौलिकंसांख्यमाप्तेः॥छि॥श्रीमत्कूर्मपुराणेइंद्रद्युम्न
प्रतिश्रीकूर्मवचनानि॥त्रिविधाःभावनाःब्रह्मन्प्रोच्यमानांनिबोधमे॥एकामद्विषयातत्र
द्वितीयाव्यक्तसंश्रया॥अन्यातुसगुणाब्राह्मीविज्ञेयात्रिगुणातिगा॥आसामन्यतमांचयभा
वनांभावयेद्बुधः॥अशक्तस्संश्रयेदाद्यामित्येषावैदिकीश्रुतिः॥तस्मात्सर्वप्रयत्नेनस्त
न्निष्ठस्तत्परायणः॥तमाराधयविश्वेशंततोमोक्षमवाप्स्यसीतिभावनानामसाश्रमा
द्यधिकार्यत्वंश्रीकूर्मेणद्वितीयाध्यायेदेवर्षीन्प्रसक्त्या॥योगीचत्रिविधोज्ञेयोभौतिकस्सां
ख्यएवच॥तृतीयासौश्रमीप्रोक्तोयोगयुक्तोममाश्रितः॥प्रथमाभावनापूर्वेसांख्येयक्षर
भावना॥तृतीयेचांतिमाप्रोक्ताभावनापारमेश्वरीसत्याश्रमीणोमुमुक्ष्वाथर्वपाशुपतानु
ध्यानपूर्वकंभस्मोद्धूलनत्रिपुंड्ररुद्राक्षधारणपंचाक्षरीजपादिनिष्ठाचेयेतत्कूर्मपु

KKSU LIBRARY
RAMTEK
441 106
M-1843
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१०

राणएवसुसीलंराजानंमोक्षार्थयतमानंप्रस्कसोर्कं॥अथास्मिंन्यंतरेपश्येसमायांतंमहा
मुनिं॥श्वेताश्वतरनामानंमहापाशुपतोत्तमं॥नस्मसंदिग्धसर्वांगंकौपीनाछादना
न्वितं॥तपसाकर्शितात्मानंशुक्लयज्ञोपवीतिनं॥समाप्यसंस्तवंराजोराजंदाश्रामलोक्षा
पाः॥चवंदेशिरसापादौप्रांजलिर्वाक्यमब्रवीत॥धन्योस्म्यनुगृहीतोस्मिपन्मेसाक्षा
न्मुनीश्वर॥योगीश्वरोयदृष्टोयंयोहियोगविदांवरः॥अहोमेसुमहद्भाग्यंतपांसि
फलितानिमे॥किंकरिष्यामिशिष्योहंभक्तंमांपालयानघ॥सोसुगृह्याधराजानंसुशीलं
शील्लसंयुतं॥शिष्यत्वेपरिजग्राहतपसाक्षीणकल्मषं॥सान्यासिकंविधिंकृत्स्नंकारयि
त्वाविचक्षणः॥तददौतदेश्वरज्ञानंस्वशाखोक्तंहितप्रदं॥अशेषपथसारंतत्सम्युपाश
विमोचनं॥अत्याश्रमयितिख्यातंब्रम्हादिभिरनुष्टितं॥उवाचशिष्यान्संप्रेक्ष्यएतदाश्र
मवासिनः॥ब्राम्हणान्क्षत्त्रियान्वैश्यान्ब्रम्हचर्यपरायणान्॥मयाप्रदर्शितांशाखा
मधीत्येवेहयोगिनः॥समासतेमहादेवंध्यायंतोनिष्कलंशिवं॥इहदेवोमहादेवोरममाण
स्सहोमया॥अध्यास्तेनगवानीशोनेकानामनुकंपया॥इहाशेषजगद्धातापुरानाराय

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णंस्वयं॥ आधारयन्महादेवं लोकानां हितकाम्यया॥ इत्याश्वनाश्वेताश्वतराणां मंत्रोपनि
षद्दिपशुपाशपतिनिरूपणं मुक्त्यर्थं योगनिरूपणं च यत्तं यच्चन्मयात्र दर्शितां शारवामिस
नेनोक्तं अत्र स्वाम्नायतत्तपःप्रभावाद्देवप्रसादाच्च ब्रह्मविद्धताश्वतरोथ विद्वान्॥ अत्या
श्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमिति सांख्येव क्षरभावनेति द्वितीयाव्य
क्तसंश्रयेति च अव्यक्ताक्षरशब्दास्यां परब्रह्मणः शिवस्य चिच्छक्तिरुक्ता जगदेतदनाद्यंतं
ब्रह्मण्येव व्यवस्थितं॥ तदात्मकं तदव्यक्तं तदक्षरमिति श्रुतिरिति कौर्मे एवं तस्यामव्याक्ता
क्षरशब्दव्यवहारदर्शनात्॥ त्रियमेवत्तीया सगुणभावना साक्षात्परमेश्वरदिव्यस्थानप्र
दापरममुक्त्युपायभूतान्च आद्येन भावनेन तद्वारेण्यं तत्त एव चिरं नारायणमेवोपासीनवचत इद्
मुक्तस्य द्वितीयभावनाप्राप्तिपूर्वकं तृतीयभावनया निरस्तनिखिलद्वैतजीवत्ताविनि
न्ते निर्गुणब्रह्मज्ञानसाधनोत्तमयोगप्राप्तिस्ततः पुः परमेश्वरदिव्यप्राप्तिश्चोक्ता संप्रा
प्य भावनामंसां ब्राम्हीमक्षरपूर्विकां॥ अवाप परमं योगं येनेकं परिवश्यति॥ यं विनद्राज
तच्छ्वासाः कोदृते मोक्षकांक्षिणा इत्यानंदमच्चलं ब्रह्मस्थानं तत्सारमेश्वरं सर्वभत्ताम

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भृतस्थः परमैश्वर्यमास्थितः॥ प्राप्तवानात्मनो धाम यत्तन्मोक्षाख्यमव्ययं॥ तस्मात्सर्वत्र यु
त्तेन वर्णाश्रमविधौ स्थितः॥ समाश्रित्यांतिमं भावमाप्नोत्यक्षीतरे ध्रुवमिति च प्राप्य स्थाने
षु तद्वपेक्षयोः स्थाने षु नास्तीति च तत्रैव द्वितीयाध्याये दर्शितं प्राजापत्यं ब्राह्मणानां स्मृतं स्था
नं क्रियावतां स्थानमैंद्रं क्षत्रियाणां संग्रामेष्वपलायिनां॥ वैश्यानां मारुतं स्थानं स्वधर्म
मनुवर्तितां॥ अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसां॥ हैरण्यगर्भं तत्स्थानं यस्मान्नाव
र्तते पुनः॥ योगीनां च मृतं स्थानं व्योमाख्यं परमक्षरं॥ आनंदमैश्वरं धाम सा का
ष्ठा सा परा गतिरिति एवं परमाकाशरूपपारमेश्वररूपं दिव्यस्थानप्राप्यं चातुर्थीयभा
वनायानिर्गुणयोगसंपादनद्वारा परमुक्तिहेतुत्वं पुराणावसाने पि स्वस्वीकृतं मया
प्रोक्तो हि भवतां योगः प्रागेव निर्गुणः॥ आरूरुक्षुस्तु सगुणं पूजयेत् परमेश्वरं॥ पद्मा
सनस्थं कूर्माभं चिंतयेद्देहिकीं श्रुतिः॥ एष योगस्य समुद्दिष्टः सबीजो मुनिपुंगवाः
ति॥ आराध्येय यथाविधि प्रकुर्वाणः प्राप्नुयादैश्वरं पदमित्येतेन अत्र तृतीयभावनाविव
क्षितेसेतदाभ्यसभावनाद्वयविषयविवेचनेन स्पष्टीकृतं अनंतरमेव हि च आद्ये च भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावनेशुद्धे प्रागुक्तेभवत्तामिह। अत्रापि कथितो योगो निर्बीजश्च सबीजकः॥ ज्ञानं दद्युक्तं निर्बीजं
तुर्वैहि नवतां मया॥ इत्याद्यनाभावेनयोरपि सगुणनिर्गुणविषयत्वेन द्वैविध्यमुक्तं सगुणयोस्त
योः॥ विष्णुरुद्रविरिंचं चार्यासबीजं नानुयेद्बुधः॥ अथवाग्न्यादिकान्देवान्तत्परसंयतेंद्रियइति
काश्चनविषयानापात तः॥ प्रदर्श पूजयेत्पुरुषं विष्णुं चतुर्मूर्तिं परं हरिं॥ अनादिनिधनं देवं
वासुदेवं सनातनं॥ नारायणं जगद्योनिमाकाशं परमं पदं॥ तल्लिंगधारीनियतस्तद्भक्तस्त
त्परायणः॥ एषएवविधिर्ब्राह्मे भावनेचेतिमेमतिरिति॥ अत्रबाह्यपूजायश्चेव अयभावना
द्वयस्यापिविषयोक्यापूजयेत्पुरुषं विष्णुमित्यादौ चतुर्भुजत्वादिविशिष्टविष्णुरूपंतन्मूल
परमाकाशरूपंचविवक्षितमित्यवस्थितेतदनुसारेणाकाशंपरमंपदमित्येतद्द्वितीयभा
वनाविषयसमर्थकत्वेनप्रत्येकं योजनीयं तल्लिंगधारीयत्रतल्लिंगद्वितीयाध्यायेदर्शितं
आश्रमो वैष्णवो ब्राह्मो हराश्रम इति त्रयः॥ तल्लिंगधारीनियतस्तद्भक्तजनवत्सलः॥ ध्यायेत्
तथार्चयेदेतान्ब्रह्मविद्यापरायणः॥ सर्वेषामेवलिंगानां शस्योलिंगमनुत्तमं॥ दीनेनभस्म
नाकार्यंललाटेतुत्रिपुंड्रकं॥ यस्तुनारायणंदेवंप्रपन्नः परमंपदं॥ धारयेत्सर्वदाशूलंललाटे

X5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१२

तिलकं धारणीयं तु सर्वदेति॥ आदिशब्दादुपासनायाः नारायणोपासनायाश्च विग्रहविषयत्वं तल्लो
कप्राप्ति द्वारा वापेक्षणीयं परिशेषाद्विविध मोत्तरादिषु सिद्धमुमा विग्रहविषयत्वं तल्लोकप्राप्तिद्वार
त्व— वदर्शयति॥ विद्वांसः शंकरस्य श्रुतिमतिमहितोपासना वासनाभि— ब्द स्वांतप्रतिष्ठा सुदृढ
मभितुयांतं विलोक्यमनेव॥ गोलोकस्योर्ध्वभागादपि परमपदं देवं वा दूर्ध्वदेशे भास्करकोटि
प्रभं यांस्य पुनरपगमस्थानमानंदरूपं॥८॥ श्रवणमननयोर्विध्यभावानि मेये शंकायां लौकीक
प्रामाण्येनैव तयोर्नियमतः प्राप्तिमभिप्रेत्यश्रुतिमतिमहिमे विशेषणं श्रवणमननोपास
नानामभेदविषयत्वात् द्वासनादाढ्र्येन तत्फलस्य साक्षात्कारस्याप्यभेदसिद्धि— — — —
— — — — — — — — — सनायास्साक्षात्कारद्वारत्वाभेदविषयत्वयोरिंद्रपुम्नं प्रति श्रीकूर्मवचनं॥
सर्वसंगान्परित्यज्य ज्ञात्वा मायामयं जगत्॥ अद्वैतं भावयात्मानं द्रक्ष्यसे परमेश्वरमिति॥
गोलोकस्योर्ध्व भागे वैकुंठं पदमित्यत्र श्रुतिः॥ तेते धामान्युश्मसी गमध्ये भगावोयत्र भूरिश्रृं
गा अयासः॥ अत्राहतदुरुगायस्य विष्णोः परमं पदमवभाति भूरेरिति॥ विष्णोस्तेता नितद्धद्वाद
दुवचनस्य सुपांसुलुगिति सूत्रेण शे इत्ययमादेशः॥ तेतव धामानि स्थानानि गमध्ये गंतु उश्म
सि इच्छामग मध्ये इति गमेर्धातो स्तुमर्थे सनीसादि सूत्रेण तुमुन्प्रत्ययार्थ अध्ये इति प्रत्ययः॥

राम
१२

परीक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्त - - - - कांतावियस्माद्वातोरुत्तमपुरुषवकुवचनेइदंतमसारितिसूत्रेणअंतमइकाराग
मःसांहितोदीर्घःतान्येवधामानिविशेष्यंतेयत्रयेषुस्थानेषुआयासःअनपायिन्यःयातेरस्तु
न्प्रत्ययेनईसमासःभूरिशृंगाः॥दीर्घशृंगाःगावोनंदीदयोगोमातरस्संतिअत्राहयेषु
स्थानेषुआहेतिनिपातएवकारार्थःतत्रमिदुरुगायस्यउरुभिर्महाद्भिर्गीयमानस्य
भूरेमर्महतोविष्णोस्तत्परमंअधस्तनविष्णुलोकापेक्षयाउत्कृष्टपदंअवभातिमन्
निवलोकस्याधस्ताद्भातीतिचचनैवब्रम्हणःस्थानात्तस्यपरंस्थानंप्रकाशतइतिब्रम्हलो
कासत्वेनश्रुतस्यविष्णुलोकस्यकथंगोलोकांतर्गतत्वमितिशंकनीयंगोलोकस्यापिब्रम्ह
लोकासत्वात्।अतएवानुशासनिकेकथंगोलोकस्यब्रम्हलोकासत्वमितिपृष्टवंतंयुधि
ष्टिरंप्रतितत्कारणंब्रम्हवरदानंभीष्मेणोक्तंपेचर्यतिवकुंचगागोलोकंयांतुतेनराःम
त्तोकोचरिवत्स्यंतिभवस्योरोहिणीघजाइतिमत्तोकोपरितेलोकोभवितास्तुरभेस्सदा॥व
त्सुतास्थिजगद्भूत्येगावोभूम्यांचरंविहेनिहरिवंशेगोवर्धनोद्धरणेनगास्संरक्षितवं
तेवकंप्रतिशक्रवचनेनापिब्रम्हलोकादुपरिगोलोकःतस्योपरिभागेवैकुंठंपरमंपद

17

मितिप्रतिपादितं स्वर्गाद् ऊर्ध्वं ब्रह्मलोको महर्षिगणसेवितः ॥ तस्योपरि गवांलोकस्साध्या
स्तं पालयंति हि ॥ सो हि सर्वगतः स्वच्छ महाकाशगतो महान् ॥ उपर्युपरि नचाद्यगतिस्त
पनः पोमयी ॥ यां न विद्म वयं सर्वे पृच्छंतोपि पितामहं ॥ यां योगनिरता विप्रा जजं ते ब्रह्मवा
दिन इति साध्याः यत्र पूर्वे साध्याः संति देवा इति पुरुषसूक्तमंत्रोक्ता देवाः उपर्युपरि
गवां समीप एव उपरिभागे शिवधर्मोत्तरे तु शास्त्रे पंचमोध्याये ब्रह्मलोकात् परं विष्णु
लोकं प्रवक्षते यं विष्णुपदाद् ऊर्ध्वं दिव्यं शिवपदं महत् ॥ भोगसंस्थानमतुलं कर्मयो
गरतात्मनां अष्टमेयगणे [illegible] दिव्यैर्विमानैस्सर्वकामगैः ॥ असंख्येयस्तत्पदं प्राप्य सर्व
प्राप्युपकारकैः ॥ सह स्वंभ्रमिविस्तीर्णैः सूर्यकोटिसमप्रभैः ॥ रुद्रलोकमिति प्रोक्तम
शेषगणसंयुतं ॥ सर्वेषां शिवभक्तानां तत्पदं परिकीर्तितं ॥ रुद्रक्षेत्रमृतानां च जंगमस्था राम
चरात्मनां इत्यादिवचनेन परं शिवलोकं वर्णयित्वा इयेतत्परमं प्रोक्तं श्रीमच्छिवपुरं म १३
हत् ॥ देहिनो कर्मनिष्ठा नो पुनरावर्त्तयं तस्मात्तमिति शिवप्रसंगं परिसमाप्य ऊर्ध्वं शिवपु
राधेयं स्थानं रौवमनुत्तमं नियंप [illegible] रमस्त्युर्द्धं च स्कंदो मांशंक राम कमियन्नो पुनर्द्वादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाध्याये विष्णुलोकच्चापरतः श्रीमच्छिवपुरं महत् ॥ द्वात्रिंशो कोटिविस्तीर्णं द्विगुणेन समुच्छ्रि
ते मिमादिना मंतत्वाग्र पंचेन अपूर्वं शिवपुरं वर्णयिता तत्र सर्वे नो जेन्द्र मणिमंटपे शिमस्यावत्स
वमुवती ईश्वराय पतुं नेस्याग्रे श्रीमन्नघमौरुषक्षितं ॥ — तवीरवृत्तस्तत्र नित्यं गोष्ठांतर
स्थितः ॥ गोलोकं शिवलोकश्च एकएव न तत्स्मृतः ॥ ये गुणा रु — लोकस्य गोलोकस्यापि ते गुणाः ॥
इत्यपरशिवलोकांतर्गतं गोलोकमभिधाय शिवलोकात्परं ज्ञेयमंडस्यावरणाष्टकं ॥ आ
दौ हृदूर्ध्वं पुनर्ज्ञेयं प्रकृतेर्मध्यतः स्थितं ॥ ब्रह्मणः परमं स्थानं पद्मरागसमप्रभं ब्रह्मलो
कात्परं ज्ञेयं विष्णोः स्थानं सनातनं ॥ इंद्रनीलप्रतीकाशं महानागैरलंकृतं ॥ विष्णुलोकात्प
रं स्थानं कुमारस्य महात्मनः ॥ स्वच्छमौक्तिकसंकाशं चरन्नोगसमन्वितं ॥ स्कंदस्थानात्पर
स्थानमुमादेव्याः प्रकीर्तितं ॥ तप्तचामीकरप्रख्यमशेषगुणसंयुतं ॥ उमास्थानाच्च परतः
स्थानमार्यमुमापतेः ॥ दिनसत्कोटिसंकाशं सर्वकामसमन्वितमिति ब्रह्मांडादूर्ध्वं स्कंदो
मांशंकरलोकवत् ॥ ब्रह्मविष्णुलोकावप्युच्चौ स्कांदकाशीखंडे उमालोकात्परोपि गोलोको
दर्शितः ॥ शिवलोकाच्च गोलोका उमालोकाच्च सर्वतः कुमारलोकाद्वैकुंठात्सस लोकास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१४

परिक्षा

मंततः॥ तपोजनन्महश्चय श्चसर्वे स्वल्लोकवासिनः॥ ऊर्ध्वलोकाच्च भूलोकान्नागलोकात्तथा
शिवात्॥ तस्मात्तु माधेसमा यांति त्रयागमरूपोदयइति। अयमेवल्लोकोत्र विवक्षितः॥ इदंश्री
कंठाचार्यविरचित ब्रह्ममीमांसाभाष्याभिमतं रहस्यार्थजातं संक्षिप्तं अत्र मूलाभिप्रा
यवचनान्युदाहरिष्यामः॥ तत्र धर्मज्ञानरूपायाश्चक्तेस्सकलधर्मि गुणरूपत्वं सर्व
त्र प्रसिद्धोपदेशादियधिकरणे दर्शितं सकलचिदचित्प्रपंचमहाविभूतिरूपामहासं
विदानंदसत्तादेशाकालादिपरिच्छेदशून्यास्वाभाविकूपरशक्तिः परब्रह्मणः शिवस्य
स्वरूपं च गुणाश्च भवति तद्व्यतिरेकेण ब्रह्मणस्सर्वज्ञत्वे सर्वशक्तित्व सर्वकारणत्व सर्व
नियंतृत्व सर्वोपास्यत्व सर्वानुग्रहकत्व सर्वपुरुषार्थहेतुत्वादिकं सर्वं गतत्वेचन संभवति॥
किंच महेश्वरशिवमहादेवरुद्रादिपरमाख्याभिधेयत्वेचनसंभवतीतितस्यास्सकलज
गदाधारपरमाकाशरूपत्वं जन्मादिसूत्र आकाशशरीरं ब्रह्मेति श्रुति व्याया दर्शितं आकाशात्
इत्याकाशः चिदंबरमुच्यते नभूताकाशः विशेषाभावात्॥ निखिलजंडंबं डबुद्बुदनिकुरं
बस्थानीयपरप्रवलनिरूपापरमशक्तिर्हि चिदंबरमुच्यते न त्वस्वरूपं ब्रह्माकाशशरीरंप रप्रकृतित्वं

ग
शम
१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिदाकाशस्यसर्वाणिइमानिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेआकाशंप्रत्यस्तंयंति
आकाशोवैनामरूपयोर्निर्वहितौतेदिश्रुतिसिद्धमितिदहराधिकरणेपिअथयदय
मात्मासर्सेतुर्विधृतिरेषांलोकानामसंभेदायेतिश्रुतसकलजगदाधारभावदहराका
शरूपत्वमस्याःप्रदर्शितंनहिदहराकाशमध्यवर्तीपरमेश्वरउपास्यःकिंतुदहराकाशोप
मेश्वरधर्मीणामपहतपाप्मत्वादीनांसंबंधप्रतीतेर्दहराकाशत्वमप्यस्यचिदंबररूपतये
तेनविरोधइतितस्याःपरब्रम्हपरमानंदरूपत्वमानंदमयाधिकरणेदर्शितंपरमाकाश
रूपःप्रत्यक्सात्मानंदमयइतिश्रूयतेनविश्वाधिकंनिमित्तंपरब्रम्हयत्सत्यंज्ञानमनंतंब्रम्हेत्यु
च्यतेतस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्याकाशादिप्रपंचप्रवृत्तिहेतुत्वेनश्रुतआनंदम
यःपरमाकाशःपरमाकाशरूपत्वमप्यस्यव्यपदेशआकाशआनंदोनस्यादित्यादिसत्तोवगम्यतेब्रम्ह
पुच्छंप्रतिष्ठेतिब्रम्हआनंदाकाशस्याधारत्वेनावगम्यतेअतएवएकोआनंदइतिब्रम्हाश्रितत्वे ब्रह्मण
नावगम्यतेपुनरेषएवानंदोब्रम्हेतिव्यजानात्।आनंदाद्ध्येवखल्विमानिभूतानिजायंते
इत्यादिनासकलभूतप्रकृतित्वेनाभिधीयतेतत्रानंदोब्रम्हेत्यानंदस्यब्रम्हव्यपदेशस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१५

परिक्षा

ब्रम्हधर्मत्वेन तद्भेदात् सैषा भार्गवी वारुणी विद्या —— परमे व्योमन्प्रतिष्ठितेति ब्रम्हधर्मस्वरू
पे परमानंदरूपे प्रपंचत्रक्रेतौ परमशक्तिपर्याये चिदात्मनि परमव्योम– वारुणी विद्यासमा
तिरुच्यते ततो ब्रम्हधर्मस्य स्वभावः ब्रस्यात्मा परमाकाशरूपा परमशक्तिरानंदमय इस
सतेतद्धर्मित्वेन प्रतिष्ठितेच्यते परब्रम्हेति इदमेव मतमाचार्याणामभिमतेनेवानंदम
यः परं ब्रम्हेति मत्तमिति शिवादित्यमणिदीपिकायां शिवानंदलहर्यां च निपुणतरमु
पपादितमस्माभिः जगत्सत्तास्फूर्त्योर्ब्रम्हेश्चिच्छक्त्यंशरूपत्वं मारंभणाधिकरणेऽव्यक्ति
रकमुखेन दर्शितं सच्चिद्रूपेण शिवेन यदि न व्याप्तं जगत्तदा सत्तास्फूर्तिभ्यां विना
स्तं कथमस्ति स्फुरतीति च दृश्यते अतो मृदा घटादिकमिव कारणेन शिवेन कार्यमिदं
व्याप्तमिति अत्र यद्यपि धर्मिणः शिवस्यैव जगत्सत्तास्फूर्तिरूपत्वमुक्तमिति भातितथा
पि धर्मद्वारकमेव तस्य तद्विवक्षितमिति नेतव्यं मृदा घटादिकमिवेति परिणामिदृष्टां राम १८
तानुगुण्यात् तदव्यक्तमाह हीति सूत्रभाष्यप्रसङ्गादिना सिद्धा सत्ता न ब्रम्हैकस्य कला
त्तस्यास्सकलजगदानंदरूपत्वे अभावं ब दर्शीरियधिकरणे परत्र वक्ष्यति रूपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परसत्ताप्रकाशानंदसमरसासरमशक्तिर्हिःपरब्रह्मणःस्वरूपभूतापरमाकाशउ
च्यतइतितांप्रत्यसप्रदर्शितिःकोह्येवान्यात्कःप्राण्यात्॥यदेषआकाशआनंदोनस्या
त्॥१९एषह्येवानंदयातिः।रसोवैसः।रसंह्येवायंलब्ध्वानंदीभवतीतिसर्वानुभवविषय
त्वमस्याः॥श्रूयतेतथाचसएकोमानुषआनंदइत्यारभ्यसएकोब्रह्मणआनंदइतिब्र
वि ह्मपर्यंतमुपाधितिरोधानादानंदोत्कर्षस्तारतम्येनश्रूयतइतितथाआकाशोपास्तेचिद्ध
क्तिविषयत्वमाकाशस्तल्लिंगादित्यधिकरणेनभूताकाशइतिपूर्वपक्षनिराकरणंसंभ
भूतग्रहणप्रयोजनंप्रश्नोत्तराभ्यामाविष्कृतंभूताकाशइत्यपपदग्रहणेनकिमिति
चेत्परमाकाशस्यपरमप्रकृतिरूपस्यसर्वभूतकारणत्वसंभवासप्रयोजनेतर्हि
परमेश्वरइतिकथंनिर्णयः।सदेवसोदादितिसिद्धमितिजन्मादिसूत्रेएतदीधिकरणवि
षयवाक्यस्यआकाशोहवैतरस्त्वादिव्यपदेशादित्यधिकरणविषयवाक्यस्यचचिद्धक्ति
विषयत्वेनलिखितत्वादर्थ्यमर्थःस्पष्टः।एवंसर्वत्रब्रह्मलिंगवन्निर्देशाकाशपदयुक्त
वाक्यानांचिद्धक्तिविषयत्वोन्नयागापत्रीवोदद८सर्वेभूतमिसादिनानिरूपितायाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१६

परिक्षा

…तेद्वैतद्ब्रह्मेति इदं वाव तत् । योऽयं बहिर्धा
पर्युपासमायाअपितद्विषयत्वं सूचितं अत्रापि एतद्वै तद्ब्रह्मेति इदं वाव तत् योऽयं बहिर्धा
पुरुषादाकाश इति श्रुतिगायत्रिपरामर्शितत्शब्दसमानाधिकरणतया तद्विषयस्य ब्रह्म
शब्दस्याकाशशब्देन सामानाधिकरण्यात्तथा अत एव प्राण इत्यधिकरणनिर्णिता
प्राणोपासनापितद्विषयात् अत्रापि सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्रा
णमभ्युज्जिहते इति सर्वभूतोत्पत्तिलयाकारणत्वलिंगसद्भावेन सर्वलोकगत्या आकाश
विशेषणात् आकाशस्तल्लिंगात् अत एव प्राण इति सूत्रयोर्न्यायसामान्येन समानवि
षयित्वं सूचयितुंभाष्ये युगवल्लिखितत्वाच्च प्राणारामं मन इति श्रुतौ प्राणशब्दस्य सकलाधा
रभूता चिदं बरशक्तिरिरुच्यते स्वरूपभूता यां तस्यामेवारामो यस्य तं प्राणारामं मनिति
जन्मादिसूत्रे चिच्छक्तिपरतया व्याख्यातत्वाच्च तथा धर्मिणः सकलजगत्सर्गरक्षासंह रामं
रणतिरोधनानुग्रहरूपपंचकृत्य — — त्वं जन्मादिसूत्रे पूर्वं ज्ञेवादिविशिष्टमभ्यधिकर १६
णेशिवत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यत इत्यादिनाप्रपंचितं चिच्छक्तेः पुरुषरूपप्राप्यासक
लजगदुपादानत्वं प्रत्यधिकरणे मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं तस्यावयवभूत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनव्याप्तं सर्वमिदं जगदिति श्रवणान्मायायाः सकलप्रसवित्वं नहि शिष्टत्वं महेश्वरस्य तदवय
चक्षते न चिच्छक्तिशाकल्यभक्तेन भोक्तृत्वं दृष्टायां पुरुषसंज्ञिकेन सकलजगद्व्याप्तिश्चावगम्य
त इति मायिनः परमेश्वरात् सकलचेतनाचेतनप्रसूतिः पुरुषोपि व्यक्तो भवतीति तद्रूपादीश्व
राद्व्यक्ताच्च चतुर्मुखाद्युत्पत्तिः तथा च श्रुतिः ईश्वरस्य पुरुषरूपत्वमभिधत्ते पुरुषो वै रुद्र इ
ति च प्रदर्शितं अत्र श्रुतिगतमवयवभक्ते ------ दाभक्ते नेसनेन व्याख्यातं तदपि महेश्व
रत्वेन साक्षात् किंतु तद्धर्मचिच्छक्त्यां शालद्वारमिति चिच्छक्तिशाकल्येनेप्यनेन वि ----- ने
त्ति व्यक्तव्ये शाकल्येन स्फूर्तिः विश्वोत्तरोत्तरविचित्रमनोरथस्य यस्यैकशक्तिशाकल्ये सकलः स
मास्तः अध्यायमध्यपतितमप्यविदोषवदंतितस्मै नमः सकललोकविलक्षणायेति शिवपुरा
णवचनस्यस्योक्तार्थवविषयत्वद्योतनार्थं अव्यक्ताच्चतुर्मुखाद्युत्पत्तिरिति जडाजडसकल
प्रपंचोदानत्वमुक्तं स्त्रीरूपप्राप्यापरब्रह्ममहिषीत्वं बहुषु स्थलेषु श्रुत ७ सत्यमिति मंत्रार्थक
चनेकृष्णपिंगलशब्दगृहीतत्वया व्याख्यातं पुरुषस्य नारायणस्य ब्रह्मकोटित्वं — ध्यनिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकरणे प्रपंचाकारत्वमंतरेण पञ्चिरतिशयानंदस्वभावं - - - - - - - - तदेवहि
वाभिधेयं परं ब्रह्मेति विष्णुशिवयोरुपादाननिमित्तयोरवस्थानभेदमंतरेण स्वरूपभे
दो नास्तीति - - - - - - - - रुद्र इति परमेश्वरस्य सर्वात्मकताभिधानमुपक्रम्य पु
रुषस्य नारायणस्य हि सर्वात्मत्वं उपादानत्वात् ॥ कथमस्य सर्वात्मत्वमित्याशंकायां पुरु
षो वै रुद्र इति पुरुषस्य विश्वसहस्राक्षस्य महादेवस्य धीमहीति च पुरुषोपि परमेश्वर
स्य महाविभूतासाजगदाधार इति निरूपितमिति उमायाः परब्रह्मकोटित्वं तत्रैवा
धिकरणे ऋतं सत्यमिति मंत्रार्थविवरणे परस्तात्प्रणववर्णव्यत्यासरूपोमाशब्दवा
च्यपाशबलाकारत्वेन कृष्णपिंगलमित्यनेन वाक्येन दर्शितं अत्र हि परब्रह्मलिंगं प्र
णववाच्यत्वमुमायामप्यस्तितत्र प्रणवमात्राणामुकारः प्रथमं ततो मकारस्तदनंतरमं
कार इति व्यत्यास - - - न मंत्रमिति दर्शितो अयमर्थो लिंगपुराणे शिवेनांबिकायै वर्णितः ।
त्वदीयः प्रणवः कश्चिन्मदीयः प्रणवस्तथा । त्वदीयो देवि मात्राणां व्यत्यासात् नसंशयः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अकारोकारमकारा मदीये प्रणवे स्थिताः॥ उकारं च मकारं च अकारं च क्रमेण तु। त्वदीयं प्रणवं
विद्धि मात्रा प्लुतमुत्तमम् इति वचनबलादाकारस्य प्लुतत्वावः तस्मादोंबीजमुमारोक्तिरित्यादौ
प्लुतोच्चारणं कार्यं लोके तु स्त्रीत्वविवक्षायां टाबियादीर्घान्तत्वमुपपद्यते नारायणस्य परि
णामित्वयोपादानत्वं प्रकृत्यधिकरणे परिणामादिति सूत्रभाष्ये निर्विकारस्य शिवस्य परि
णामासंभवशंकायां पयानिमित्तस्य प्रवृत्तिलेपि न विकारादिस्पर्शः तथा परिणामस्सं
भवतीति तत्परिवारं प्रतिज्ञाय कोयमपूर्वः परिणामः कुत्र हलिनः तत्पूर्वणो विविच्यतामि
तिशंकामुद्भाव्य श्रृणु विवेचयामह इत्यादिना सूक्ष्मचिन्निर्विकारस्य पुरुषावस्थाद्वारतः परि
णाम इत्युपादानेन दर्शितं तथा प्रतिबिंबवादि इत्यधिकरणेप्युक्तं सर्वज्ञात्सर्वशक्तिमतः पर
ब्रह्मणः शिवादित्वाधिकारप्रथमं परप्रवृत्तेः पराशक्तिः प्रादुर्भवति सा प्रथमं भोक्तृल
दशायां पुरुष इत्युच्यते यस्सहस्रशीर्षा पुरुष इत्युच्यते तदात्मन एव शिवात्स कल्पचेतनाचे
तनप्रपंचपरिणाम इति जीवानां स्वरूपेणातद्विकारत्वे किंतु धर्मज्ञानसंकोचविकासादिवि
शिष्टतया स्वरूपतस्तु तदंशा इत्येशो नानाव्यपदेशादित्यधिकरणभाष्ये प्रपंचितं नाराय-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१८

णाश्रयस्य शिवपदप्राप्तिसाधनत्वेपांचरात्राधिकरणे पांचरात्र्याप्रामाण्यासाधनानंतरं शंकोत्त
राभ्यां प्रदर्शितं ननु पुरुषो वै रुद्र इत्यादिश्रुत्या परमेश्वरत्व पुरुषो वासुदेव ॥ तद्दानाराधनाधि
कमपि क्रमेण पदप्राप्तिरमेश्वरपदप्राप्ति साधनमिति श्रुयते तदाराधनप्रतिपादकस्य पां
चरात्रस्याप्रामाण्ये तस्यानाराध्यप्रसंग इति चेत् श्रुतिविरोधात्तस्याप्रामाण्येपि तस्य का
निश्चिताप्रसिद्धमार्गेण तदाराधनस्येत्र्वादिति देव देवे वेदुष्टत्वमाघस्थानस्यते हिंसा
साद्विविषद इत्यादि वचनोदाहरणेन सूचितं तस्य पब्रम्हशक्तिरूपपरं मानंदत्वं चिरोधं
चदर्शयतीति सूत्रभाष्ये विस्तरोः प्रपंचिता वस्थितस्य परममुक्तैरूपं दं स्वरूपं परमाकाश
रूपं परमानंदत्वक्षणं शिवस्य परब्रम्हणः पदमेव यत्रासो पुराणनिहितात्मा प्रपंचाकारो
पिस्संसरतीति चेत्कव्याप्य परा शक्ति विशेषणां उमां शोने दत्त्व मप्रती कालेपिनानीति सूत्र
भाष्ये सर्वज्ञत्तयामनो वा शिवपर्यास रहितं स्वशक्तिमरीचिभिः सकलजगत्तरकं स्वावि
भक्तया परप्रकृतिरूपायापरमानंदत्वेदेकरूपपरमाकाशलक्षणया स्वावरूथाप्से दूपर
चेतननारायणाभिव्यक्तहिरण्यगर्भासिकल कार्यप्रपंच पापरशोत्याउमयाशबलितपर्यौ
दि

परिक्षा

राम
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्धिकारं त्रिलोचनं परं ब्रम्ह सर्वोत्तरमिति श्रुत्र सशक्तिमरीचयः स्वशक्तेः परमप्रकाशरू
पायामरीचयस्तु देशभर्त्ताः वैकुण्ठ्यादिशक्तिविशेषा विवक्षितास्सुर्वं च प्रसिद्धो पदे=
शादिसधिकरणे शिवस्य सर्वानुग्रहकत्वादिधर्माणां शक्त्यधीन प्रतिपादनात्॥
तस्याः श्रुतिसिद्धं परब्रम्हविद्यापदार्त्तत्वं सूचितं वृहत्सुस्थलेषु उमासहायं परमेश्व
रं प्रभुं त्रिलोचने नीलकंठं प्रशांतं॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तम
सः परस्तात् ऋतं सत्यं परं ब्रम्हपुरुषं कृष्णपिंगलं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय उमापतये पशु
पतये नमोनम इति कैवल्योपनिषदादिमंत्राणामुदाहरणात्॥ तस्यास्मिह सहोपा
सना नियमः सूचितः॥ शिवोपासनायाः साक्षाद्दिव्यस्थानप्रदत्वं श्रुमसूत्रे मा
रभ्य तत्रतत्र बहुधाप्रतिमादितं तस्याः साक्षात्कारदारत्वं विकल्पो विशिष्टफलत्वा
त्॥ अप्रायणात्तत्रापिहि दृष्टमित्यधिकरणयोरुक्तं उपासनासाक्षात्कारयोः शिव
जीवाभेदविषयत्वं आत्मेतित्पयक्षति ग्राहयंति चेत्यधिकरणे वर्णितं उमानारायणो
पासनयोः परंपरया दिव्यस्थानप्राप्तिहेतुत्वमप्रतिकाल्पेन नीतिसूत्रभाष्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नत्रय
१९

दर्शितं तेब्रह्मलोके तुपरांतकाले परामृतात्परिमुच्यंति सर्वे इति श्रुतेः परब्रह्मणः
शिवस्य परमविष्णुत्वेन ये विष्णुमुपासते ते तदवस्थानाद्ब्रह्मशब्दवाच्यस्य लोकं प्राप्य
प्रादुर्भूतनविष्णुतयः परांतकाले परमदेहावसाने परामृते शिवे प्राप्य मुक्ताश्चेतीति वि
ष्णूपासकानां मरीच्यादीनां विष्णुपदप्राप्तिपूर्वकं त्रिलोचनशिवपदप्राप्तिरिति निर्णीतो य
च्छोपासनायामुक्तमिदं अविविक्तोपासनायामपि तुल्यं न्यायसाम्यात् ॥ कन्यारूपामु
माशांतां सूर्यकोटिसमप्रभां ॥ ध्यायमानः सदा भक्त्या देव्या स्थानमवाप्नुयात् इति शि
वधर्मोत्तरेणतदुपासनायास्तल्लोकप्राप्तिहेतुत्वस्योक्तत्वाच्च तल्लोकप्राप्तिद्वारकत्वोक्ति
शिवोपासनाद्वारकत्वस्याप्युपलक्षणं ॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः न
दा शिवमविज्ञाय दुःखस्यांतो भविष्यतीति मंत्रस्य भाष्ये बृहदुपदेशे दहरत्वाद्दिव्य
स्थानस्य विष्णुलोकस्य सर्वस्योपरायाधिकरणे दर्शितं विष्णुपदसंबंधिविरजानदी
प्राकृतप्रपंचसीमावधिः तदनुप्रवेशप्रक्षीणसर्वकर्मलोका योगिनो विष्णुपदादूर्ध्वं
प्राप्तं शिवपदे परमानंदमनुप्रविशंतीति अत्र विष्णुलोको गोलोकांतर्गत एव विवक्षि

परिक्षा

रो
राम
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः ननु परमशिवलोकान्तर्गतः परमशिवलोके प्राप्तानां पुनस्संसरणाभावस्तु अनावृ
त्त्यधिकरणे। दिनकृत्कोटिसंकाशं स्थानमाद्यमुमापतेः॥ सर्वकामसमायुक्ते विशुद्ध
निर्मलक्षये॥ सम्प्राप्य तत्पदं दिव्यं समस्तक्लेशवर्जिताः॥ सर्वज्ञाः सर्वगाः शुद्धाः परि
पूर्णा भवन्ति च॥ विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः॥ सदेहाश्च विदेहाश्च भवे
सालोक्येश्च या पुनः॥ ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः॥ न तेषां पुनरावृत्तिर्घो
रसंसारमनुत्क्रान्तः॥ इत्यादिवचनैर्व्यवस्थापित इति सर्वं समंजसं॥८॥ ॥ ॥८॥
आमध्यमाप्यदुग्धाब्धिमाहं रत्नत्रयं यतः॥ श्रीकण्ठगौरीहरिश्चेति तत्त्वसम्यक्परी
क्षितेः॥ ॥इति श्रीमद्भरद्वाजजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि
द्याजि श्रीरंगराजाध्वरिसूनोरप्पय्यदीक्षितार्यस्य कृतिः रत्नत्रयपरीक्षास
माप्ता॥ ॥८॥ ॥श्रीविश्वेश्वरार्पणमस्तु॥ ॥श्रीराजराजेश्वर्यै नमः॥

KKSU LIBRARY
RAMTEK
441 106
M-1843
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 14:14
,TRANSFERRED=2020/10/21 at 14:18:06
,PAGES=31
,TYPE=STD
,NAME=S0004299
,Book Name=M-1843-RATANTRAY PARIKSHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection